Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 1 | ISSN : 2581- 6306

# तत्त्वचिन्तामणौ न्यायलक्षणस्य तुलनात्मकमध्ययनम्

**राजेश्वर विश्वासशास्त्री देशमुख**
शोधच्छात्रः, संस्कृतकोशशास्त्रविभागः, डेक्कनमहाविद्यालयः, पुणे।

**सारांशिका** - इह शोधपत्रिकायां तत्वचिन्तामणिस्थस्य अनुमानखण्डान्तर्गतस्य अवयवप्रकरणस्थस्य न्यायलक्षणस्य तुलनात्मकमध्ययनं कृतमस्ति। प्रायः सप्ताधिकन्यायलक्षणव्याख्यातॄणां मतान्यत्र आलोच्यन्ते। प्रथमतः लक्षणसमन्वयरीतिमालोच्य अनन्तरं दोषः अस्ति न वा इत्यपि चिन्तितमस्ति। अन्ततश्च दीधितिकारमतमेव सिद्धान्तितमस्ति।

**मुख्यशब्दः**– तत्वचिन्तामणिः, न्यायलक्षणम्, शास्त्रम्, संज्ञा, आन्वीक्षिकी, हेतुः, अर्थः।

षट्सु शास्त्रेषु मध्ये न्यायशास्त्रम् अनन्यसाधारणं दरीदृश्यते। एतस्य संज्ञायां न्यायपदप्रवेशोऽस्ति। तस्य च अनेकैः अनेकेऽर्थाः वर्णिताः सन्ति। यथा [1]प्रमाणैरर्थपरीक्षणं न्यायः, [2]प्रत्यक्षागमाश्रितमनुमानं न्यायः, [3]परार्थानुमानं [4]आन्वीक्षिकी विद्या, [5]साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते स पञ्चावयवोपेतवाक्यात्मको न्यायः इत्यादिः। पूर्वोक्तेषु सर्वेष्वर्थेषु न्यायपदव्यवहारेऽपि परार्थानुमाने एव तत्पदं मुख्यम् अन्यत्र तत्सम्बन्धादेव प्रवृत्तिरिति गौणम्। तथा च न्यायपदमुख्यार्थस्य परार्थानुमानस्य लिङ्गपरामर्शरूपस्य मानसबोधात्मकस्य यादृशैः वाक्यैरुत्पत्तिः तत्समूहस्यापि न्यायपदार्थत्वात् तत्प्रतिपादकत्वादेव शास्त्रमिदं न्यायशास्त्रसंज्ञामलभत। तादृशस्य पञ्चावयवसमुदायस्य तत्त्वचिन्तामणौ लक्षणं व्यरचि – “ [6] **अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यम्**इति”, “ [7] **समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यत्वम्**इति” लक्षणस्य [8]दूषणं च । तत्र च मण्युक्तलक्षणव्याख्यानम् अनेकैः अनेकप्रकारैः कृतम्। तत्र प्रमुखानि कानिचिन्मतान्यनूद्य तुलयामि।

तत्र [9]**वर्धमानोपाध्यायैः** लक्षणघटकप्रयोजकपदस्य जनकत्वमेवार्थः चरमकारणत्वस्य च स्वोत्तरोत्पन्नभाविज्ञानानपेक्षत्वमित्यर्थो वर्णितः। [10]**जयदेवमिश्रैः** प्रयोजकपदस्य जनकजनकत्वमित्यर्थो वर्णितः, चरमकारणत्वस्य च पूर्वोक्त एव। [11]**रुचिदत्तमिश्रैः**

---

[1] न्या.वा. पृ. क्र. 13

[2] न्या.वा. पृ. क्र. 13

[3] न्या को पृ क्र 447

[4] वात्स्यायनभाष्यम् पृ क्र 6

[5] वात्स्यायनभाष्यम् पृ क्र 9

[6] तत्त्वचिन्तामणि पृ क्र 1460

[7] कु प्र पृ सं 4

[8] तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यम्। अत्रैव वाक्येऽतिव्याप्तेः इति मणिपङ्क्त्या पूर्वोक्तस्य लक्षणस्य दूषणं कृतम्।

[9] त चि र पृ क्र 692

प्रयोजकपदस्य जनकज्ञानजनकत्वमित्यर्थो वर्णित:, चरमकारणत्वस्य च पूर्वोक्त एव। [12]**जगदीशतर्कालङ्कारैस्तु** अनुमितिपदं यादृशयादृशानुपूर्व्यवच्छिन्नवाक्ये नैय्यायिकानां प्रकृतपक्षकप्रकृतसाध्यकन्यायव्यवहार: तादृशतादृशानुपूर्व्यवच्छिन्नाभावकूटसाध्यकानुमितिपरम्। तच्चरमकारणीभूत: य: लिङ्गपरामर्श: तादृशतादृशानुपूर्व्यवच्छिन्नाभावकूटव्याप्यघटपदत्ववान् इत्याकार:। तस्य प्रयोजकं तज्जनकं यद्व्याप्तिज्ञानं तज्जनकं यच्छाब्दज्ञानं शब्दप्रकारकं ज्ञानमित्यर्थ:। तज्जनकं तज्जनकतावच्छेदकं यद्वाक्यं तत्त्वमिति व्याख्यातम्। अनया रीत्या सर्वांशेऽन्यथा एव लक्षणं व्याख्यातम्। [13] **मथुरानाथै:** चरमकारणत्वं स्वोत्तरोत्पन्नभाविविज्ञानानपेक्षत्वम्। प्रयोजकत्वञ्च जनकजनकत्वम्। [14] **केचित्तु** चरमकारणपदं विजातीयकारणताश्रयपरम्। तेन तादृशशाब्दबोधत्वेन कारणता लभ्यते इति। [15]**नवीनै**स्तु न्यायजन्यशाब्दबोधप्रयोज्यानुमितिव्यक्तिं तद्व्यक्तित्वेन आदाय तादृशानुमितिफलोपधायकत्वमेवेति।

एतावता पूर्वोक्तानि सप्तमतानि मण्युक्तलक्षणस्योपपादनार्थं तद्घटकदलानां स्वकीयरीत्यार्थं वर्णयाञ्चक्रु:।

[16] **दीधितिकारै**स्तु लक्षणमिदं दूषयित्वा स्वीयमेव अपूर्वलक्षणं प्रणिणायि। तच्च **"उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वमि**ति"।

पूर्वोक्तसप्तव्याख्यानानि प्रतिज्ञादिपञ्चवाक्यै: एकवाक्यतया विशिष्टैकार्थज्ञानं जन्यते इति प्रमेयम् अङ्गीकृत्य प्रवृत्तानि। अत: तदेव यदि दूष्यते तदा निरुक्तमतानां पृथग्दूषणस्य अपेक्षा नास्ति अत: दीधितिकारै: स एवांश: निरस्यते। तथाहि – प्रतिज्ञानिगमनयो: न एकविशिष्टार्थप्रतिपादकत्वम्। पर्वतो वह्निमान् इति प्रतिज्ञा तस्मात् वह्निमानयमिति निगमनम्। प्रतिज्ञाहेत्वो: धूमज्ञानज्ञाप्यवह्निमदभिन्न: पर्व्वत: इति बोध:। उभयोरपि समानाकारकत्वात् उभाभ्यां धूमज्ञानज्ञाप्यवह्निमदभिन्नपर्व्वत: धूमज्ञानज्ञाप्यवहिनमदभिन्नपर्व्वताभिन्न: इत्याकारक: स्यात्। स च न सम्भवति अभेदान्वयबोधस्य [17]विरूपोपस्थितयोरेव सम्भवात् प्रकृते च विरूपोपस्थिते: असत्त्वात् इति।

एवम् उदाहरणेनैव एक: विशिष्टवैशिष्ट्यावगाहिबोध: न सम्भवति कथं वाक्यान्तरेणैकवाक्यतया विशिष्टैकार्थप्रतिपादकत्वं स्यात्। अत: कथमपि पञ्चावयवानामेकवाक्यताया असम्भवात् अनुमितिचरमकारणलिङ्गपरामर्शस्य प्रयोजक: शाब्दबोध: एक: पञ्चभिर्वाक्यै: जायमान: विशिष्टवैशिष्ट्यावगाही न सम्भवति अत: तद्घटितलक्षणमपि सदोषमिति पूर्वोक्तानि सप्तमतान्यपि दूषितानि भवन्ति। तत्र एक: विशेष: यत् जगदीशतर्कालङ्कारमतं पूर्वोक्तदूषणेन दूषितं न भवेत्। तथाहि – अनुमिति: घटपदं तत्तदानुपूर्व्यवच्छिन्नाभावकूटव्याप्यघटपदत्ववदिति तत्प्रयोजकत्वं तज्जनकव्याप्तिज्ञानजनकत्वम्। व्याप्तिज्ञानं तत्तदानुपूर्व्यवच्छिन्नाभावव्याप्यं घटपदत्वमिति। तादृशव्याप्तिज्ञाने तत्तदानुपूर्व्यवच्छिन्नाभाव: विषय: तद्विषयकं ज्ञानम् अभावांशे तत्तदानुपूर्वीविशिष्टवाक्यप्रकारकं ज्ञानं व्याप्तिज्ञानं प्रति कारणमिति तत् परामर्शप्रयोजकं भवति। तं प्रति

---

[10] त चि प्र व्या (तर्कचूडामणि:) पृ क्र 542

[11] त चि प्र पृ क्र 541

[12] जगदीशतर्कालङ्काराणां दीधितिव्याख्यानवत् साक्षात् मणावपि व्याख्यानं वर्तते। तत्र केवलमवयवस्यैव तद्व्याख्यानं तत्वचिन्तामणिरहस्यटिप्पण्यां मुद्रितमस्ति। त चि र टि पृ क्र 690

[13] त चि र पृ क्र 693

[14] त चि र टि पृ क्र 690

[15] त चि र टि पृ क्र 691

[16] दीधिति पृ क्र 1460

[17] व्युत्पत्तिवाद: पृ क्र 48

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानविधया तत्तदानुपूर्वीविशिष्टवाक्यज्ञानं कारणं कारणतावच्छेदकञ्च विषयतासम्बन्धेन वाक्यमिति न्याये लक्षणसमन्वयः।

तथा च पूर्वोक्तरीत्या समन्वयकरणे शाब्दज्ञानपदेन शब्दप्रकारकज्ञानस्य स्वीकृतत्वात् पञ्चानामेकवाक्यतया शाब्दबोधाजनकत्वेऽपि न क्षतिरिति। परन्तु अनुमितिपरामर्शपदयोः लक्षणया विशेषपरत्वं शाब्दज्ञानपदस्य शब्दप्रकारकज्ञानपरत्वं च वर्णनीयम्। अनया रीत्या लक्षणया अर्थवर्णने क्रियमाणे कस्यापि लक्षणस्य परिष्कारः सम्भवति। एवं मणिकृन्मतसमर्थनमपि न सम्भवति। लक्षणसमन्वयस्य शाब्दबोधमनादायैव सम्भवात्। एवं सुलभतया रीत्या प्रतिज्ञादिपञ्चकसमुदायत्वस्यैव लक्षणत्वसम्भवेन पूर्वोक्तरीत्या क्लिष्टकल्पनां कृत्वा लक्षणपरिष्कारोऽनुचित इति प्रतिभाति। तथा च अनया रीत्या दीधितिकारोक्तदूषणेन स्वोक्तदूषणेन च पूर्वोक्तानि सप्तव्याख्यानानि दूषितानि भवन्ति।

इदानीं दीधितिकारेणोद्भावितदूषणस्य चिकित्सा क्रियते। यदि एकवाक्यत्वं विशिष्टैकार्थप्रतिपादकत्वं तदा पूर्वोक्तदूषणसम्भवेऽपि

[18] तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्काक्षोत्थापकत्वैतदन्यतरवत्त्वमेकवाक्यत्वमित्यङ्गीकारे पञ्चस्वपि वाक्येष्वन्यतरस्य सत्त्वात् एकवाक्यत्वमुपपन्नम्। अतः सर्वथैकवाक्यता नैव सम्भवतीति कथनम् अयुक्तमिति भाति।

पूर्वोक्तरीत्या दूषणेऽभिहिते दीधितिकारैः स्वकीयन्यायलक्षणमभिधीयते – “[19]उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वमिति। उचितानुपूर्वीकत्वञ्च स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तदन्यत्वं समुदायत्वविशेषणम्। तेन व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकस्य नानान्यायान्तर्गतप्रतिज्ञादिसमुदायस्य यत्किञ्चिदवयवशून्यप्रतिज्ञादिसमुदायस्य वारणं भवति।एवमपि भूतलं घटवदित्यादि उदासीनवाक्यघटकप्रतिज्ञादिसमुदायस्य वारणं न सम्भवति अतः तस्यापि न्यायत्वापत्तिरिति न च वाच्यम्। तद्वारणार्थं समुदायत्वे प्रतिज्ञादिवृत्तित्वं निवेश्यते। प्रतिज्ञादिवृत्तित्वञ्च प्रतिज्ञात्वादिपर्याप्यवच्छेदकयत्किञ्चिद्धर्मपञ्चकव्यापकत्वम्। आदिपदेन हेतुत्वम् उदाहरणत्वम् उपनयत्वं निगमनत्वञ्ञ ग्राह्यम्। एतावता परिष्कृतलक्षणस्य समन्वयः क्रियते।

पूर्वोक्तोचितानुपूर्वीकत्वशरीरे प्रतियोगिनि स्वत्वं प्रविष्टमिति स्वपदेन व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तिसमुदायत्वं यत्किञ्चिदवयवशून्यप्रतिज्ञादिसमुदायत्वं नानान्यायान्तर्गतप्रतिज्ञादिसमुदायत्वं ग्राह्यम्। तत्स्वाश्रयप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वपदेन धर्तुं शक्यते। अतस्तदन्यत्वं न पूर्वोक्तेषु समुदायेषु अपितु प्रतिज्ञादिपञ्चकसमुदायत्वे एव । तत्र च प्रतिज्ञादिपञ्चकवृत्तित्वमप्यस्ति। तदाश्रयत्वं प्रतिज्ञादिपञ्चकसमुदाये इति लक्षणसमन्वयः। लक्षणेऽस्मिन् पञ्चानामेकवाक्यतया शाब्दबोधाजनकत्वेऽपि न दोषः।

लक्षणेऽस्मिन् प्रतिज्ञादीनां प्रतिज्ञात्वेनैव प्रवेशः। न तु तत्तद्व्यक्तित्वेन । तथा सति प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकस्थलेऽपि अनेकविधप्रतिज्ञादीनां सत्त्वे न्यायलक्षणस्यानुगमो न स्यात् अतः प्रतिज्ञात्वादिनैव प्रवेशः वक्तव्यः। तथासति [20]प्रतिज्ञात्वशरीरे [21]न्यायान्तर्गतत्वस्य प्रविष्टत्वात् [22]आत्माश्रय इति न च वाच्यम्। प्रतिज्ञालक्षणे न्यायान्तर्गतत्वम् उदासीनप्रतिज्ञासमानानुपूर्वीकवाक्ये अतिव्याप्तिवारणार्थं प्रविष्टं तस्या प्रकृतेऽसम्भवादेव

---

[18] गादा न्या प्र पृ क्र 1462

[19] दीधि अव प्र पृ क्र 1460

[20] प्रतिज्ञात्वञ्च प्रकृतन्यायावयवत्वे सति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वम्। न्यायावयवत्वञ्च न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यघटकत्वे सतिउभयघटकभागद्वयाघटितत्वम्। तथा च प्रतिज्ञात्वलक्षणे न्यायावयवत्वघटकतया न्यायान्तर्गतत्वं प्रविष्टम् इति।

[21] न्यायान्तर्गतत्वञ्च न्यायत्वाश्रयत्वमेव।

[22] आत्माश्रयत्वञ्च स्वज्ञप्त्यधीनज्ञप्तिविषयत्वम्।

न्यायलक्षणप्रविष्टप्रतिज्ञात्वे न्यायान्तर्गततत्वं न निवेश्यते अतो नात्माश्रय:। तथा च दीधितिकारमतानुसारेण मण्युक्तलक्षणं दुष्टमेव। अन्यैश्च व्याख्यातृभि: दीधितिकृदभिहितदूषणस्य निरास: न कृत:। अतस्तेषां व्याख्यानमपि तेनैव दुष्टमिति निर्दुष्टलक्षणं दीधितिकृतामेव प्रतिभाति।

**सन्दर्भग्रन्थसूची**

1. द्विवेदी विन्ध्येश्वरीप्रसाद, 1916, न्यायवार्तिकम्, वाराणसी, सेठ श्री जयकृष्णदास, विद्याविलासप्रेस।
2. अभ्यंकर, महामहोपाध्याय वासुदेवशास्त्री, 1978, न्यायकोश:, पुणे, भंडारकर ओरिएन्टल् रिसर्च् इन्स्तिट्यूट्।
3. शास्त्री, स्वामी द्वारिकादास, 1976, वात्स्यायनभाष्यसंवलितं गौतमीयं न्यायदर्शनम्, वाराणसी, बौद्धभारती ग्रन्थमाला–11
4. झा पं कीर्त्यानन्द, 1970, गादाधरी तत्वचिन्तामणिना दीधित्या च गर्भिता वाराणसी, चौखम्बा संस्कृतग्रन्थमाला
5. शास्त्री न्यायाचार्य ढुण्ढिराज, 1957, न्यायकुसुमाञ्जलि:, बोधन्या प्रकाशेन प्रकाशिकया मकरन्देन टिप्पण्या च समुल्लसित:, वाराणसी काशी संस्कृत ग्रन्थमाला, चौखम्बा संस्कृत सीरीज।
6. तर्कवागीश, श्रीकामाख्यानाथ, 2010, तत्वचिन्तामणिरहस्यनामकटीकासहित:, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान।
7. ताताचार्य एन एम रामानुज, 1982, तत्वचिन्तामणि: तर्कचूडामणिसहितप्रकाशसहित:, तिरुपति:, राष्ट्रिय संस्कृत विद्यापीठ
8. मेहता, चीमनलाल, (वि सं 1988), व्युत्पत्तिवाद:, प्रकाशसहित:, अहमदाबाद, चौखम्बा संस्कृत सीरिज।